**2024**

**संस्कृतवेदाध्ययनम्**

**MASVSC101**

**चितानि ऋग्वेदीयसूक्तानि**

**पूर्णाङ्कः 80**

**समयः घण्टात्रयम्**

*The figures in the margin indicate full mark for the questions:*

**अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् -** **1×10=10**

1. ऋग्वेदे कति मण्डलानि सन्ति?
2. सूर्यसूक्तस्य ऋषिः कोऽस्ति?
3. जगतस्तस्थुषश्च आत्मा कोऽस्ति?
4. यम-यमीसंवादसूक्ते(ऋग्वेदः१०.१०)कति मन्त्राः सन्ति?
5. 'ओ चित्सखायं सख्या' इति मन्त्रः कुत्र उपलभ्यते?
6. यमस्य पिता कः?
7. सरमा का?
8. पणयः कस्य अनुचराः आसन्?
9. नासदीयसूक्ते किं वर्णितमस्ति?
10. 'प्रकेतः' इति पदस्य कोऽर्थः?

**अधस्तनेषु पञ्चानां व्याख्या करणीया -** **6×5=30**

11. सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ।
    यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ॥
12. भद्रा अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः ।
    नमस्यन्तो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यन्ति सद्यः ॥
13. न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भवाति ।
    महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन् ॥
14. न यत्पुरा चकृमा कद्ध नूनमृता वदन्तो अनृतं रपेम ।
    गन्धर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि तन्नौ ॥
15. किमिच्छन्त सरमा प्रेदमानड्दूरे ह्यध्वा जगुरिः पराचैः ।
    कास्मेहितिः का परितक्म्यासीत्कथं रसाया अतरः पयांसि ॥
16. इन्द्रस्य दूतीरिषिता चरामि मह इच्छन्ती पणयो निधीन्वः ।
    अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि ॥
17. नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् ।
    किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ॥

**निम्नोक्तप्रश्नेषु चतुर्णामुत्तरं प्रदेयम् -** **10×4=40**

18. ऋग्वेदस्य विषयवस्त्वधिकृत्य एको निबन्धः प्रस्तूयताम् ।
19. ऋग्वेदस्य सूर्यसूक्तानुसारं सूर्यदेवस्य माहात्म्यं सरलसुरगिरा लिख्यताम् ।
20. ऋग्वेदीयसंवादसूक्तमधिकृत्य एको लेख उपस्थाप्यताम् ।
21. सरमा-पणिसंवादसूक्तस्य विषयवस्त्वधिकृत्य एको निबन्धः प्रस्तूयताम् ।
22. ऋग्वेदीयदार्शनिकसूक्तमधिकृत्य एको लेखः प्रस्तूयताम् ।
23. नासदीयसूक्तस्य सारांशो लिख्यताम् ।

****

**2024**

**संस्कृतवेदाध्ययनम्**

**MASVSC102**

**उपनिषत्साहित्यम् - 2**

**पूर्णाङ्कः 80**

**समयः घण्टात्रयम्**

*The figures in the margin indicate full mark for the questions:*

**अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् -** **1×10=10**

1. उपनिषद् शब्दस्य व्युत्पत्तिः का ?
2. उपनिषदां प्रतिपाद्यविषयः कः?
3. 'सत्यमेव जयते' इति उपनिषद् वाक्यं कस्याम् उपनिषदि प्राप्यते ?
4. 'मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव' इत्युपनिषद्वाक्यं कस्यामुपनिषदि उपलभ्यते ?
5. उमा-हैमवत्या आख्यानं कुत्रोपलभ्यते ?
6. ब्रह्मानन्दवल्ली कस्यामुपनिषदि वर्तते ?
7. ईशोपनिषदि कति मन्त्राः सन्ति ?
8. ईशोपनिषद् कस्याः संहिताया अन्तिमाध्यायोऽस्ति ?
9. विद्याऽविद्ययोः वर्णनं कुत्रोपलभ्यते ?
10. ईशोपनिषद अपरं नाम किम् ?

**अधस्तनेषु पञ्चानां यथानिर्देशं समाधेयम् -** **6×5=30**

11. ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
    तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ।। - व्याख्यायताम्
12. यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति ।
    सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।। - व्याख्यायताम्
13. हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
    तत्त्वं पूषन् अपावृणु सत्यधर्माय द्रष्टये ।। - व्याख्यायताम्
14. उपनिषदां महत्त्वम् - टिप्पणी प्रदेया
15. कठोपनिषद् - टिप्पणी प्रदेया
16. प्रश्नोपनिषद् - टिप्पणी प्रदेया
17. छान्दोग्योपनिषद् - टिप्पणी प्रदेया

**निम्नोक्तप्रश्नेषु चतुर्णामुत्तरं प्रदेयम् -** **10×4=40**

18. उपनिषदां प्रतिपाद्यविषयमधिकृत्य एको लेखः प्रस्तूयताम् ।
19. प्रमुख-उपनिषदां परिचयं प्रदीयताम् ।
20. मुण्डकोपनिषदः प्रतिपाद्यविषयमधिकृत्य एको लेखः प्रस्तूयताम् ।
21. ऐतरेयोपनिषदः परिचयं प्रदीयताम् ।
22. केनोपनिषदः सामान्यपरिचयमुपस्थाप्यताम् ।
23. ईशोपनिषदः स्वरूपसामान्यं प्रस्तूयताम् ।

****

**2024**

**संस्कृतवेदाध्ययनम्**

**MASVSC103**

**वेदाङ्गसाहित्यम्**

**पूर्णाङ्कः 80**

**समयः घण्टात्रयम्**

*The figures in the margin indicate full mark for the questions:*

**अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् -** **1×10=10**

1. 'अङ्गम्' इति शब्दस्य का व्युत्पत्तिः?
2. कल्पवेदाङ्गं वेदपुरुषस्य केन अङ्गेन उपमीयते?
3. ऋग्वेदस्य शिक्षावेदाङ्गं किम्?
4. कल्पवेदाङ्गस्य कति विभागाः सन्ति?
5. यजुर्वेदीयश्रौतसूत्रस्य नाम किम्?
6. अतिजगती-छन्दसि कति अक्षराणि सन्ति?
7. निरुक्तस्य भाष्यकारः कः?
8. 'इन्द्रियनित्यं वचनं' इति कस्य मतम्?
9. 'आचार्यः' इति पदस्य निर्वचनं किम् ?
10. 'गौः' इति पदस्य निर्वचनं किम् ?

**अधस्तनेषु पञ्चानां टिप्पणी/व्याख्या करणीया -** **6×5=30**

11. शिक्षा
12. गौतमधर्मसूत्रम्
13. व्याकरणम्
14. ज्योतिषम्
15. समाम्नायः समाम्नातः स व्याख्यातव्यः।
16. सत्वप्रधानानि नामानि।
17. भावप्रधानमाख्यातम्।

**निम्नोक्तप्रश्नेषु चतुर्णामुत्तरं प्रदेयम् -** **10×4=40**

18. वेदाङ्गसाहित्यमधिकृत्य प्रबन्धरेको विलिख्यताम्।
19. कल्पवेदाङ्गमधिकृत्य प्रबन्धरेको विरच्यताम्।
20. छन्दवेदाङ्गस्य परिचयो महत्त्वञ्च निरूप्यताम्।
21. निरुक्तस्य प्रयोजनमधिकृत्य एको निबन्धः प्रस्तूयताम्।
22. पदचतुष्टयमधिकृत्य प्रबन्धरेको विलिख्यताम्।
23. निरुक्तानुसारं निपातमधिकृत्य प्रबन्धरेको विलिख्यताम्।

****

**2024**

**संस्कृतवेदाध्ययनम्**

**MASVSD104**

**वैदिकसाहित्येतिहासः**

**पूर्णाङ्कः 80**

**समयः घण्टात्रयम्**

*The figures in the margin indicate full mark for the questions:*

**अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् -** **1×10=10**

1. प्राचीनतमो वेदः कः?
2. शौनकशाखा केन वेदेन सम्पृक्ता?
3. सामवेदस्य ऋत्विक् कः?
4. गोपथब्राह्मणं कस्य वेदस्यान्तर्गतम्?
5. ऐतरेयारण्यके कति आरण्यकानि सन्ति ?
6. ईशावास्योपनिषदोऽपरं नाम किम्?
7. प्रश्नोपनिषद् केन वेदेन सह सम्बद्धा वर्तते?
8. वेदस्य कति अङ्गानि सन्ति ?
9. ऋग्वेदस्य पदपाठकारः कः?
10. वेदपुरुषस्य नेत्ररूपेण किं वेदाङ्गं स्वीक्रियते?

**अधस्तनेषु पञ्चानां टिप्पणी प्रदेया -** **6×5=30**

11. शिक्षा
12. शतपथब्राह्मणम्
13. अथर्ववेदः
14. ऐतरेयारण्यकम्
15. प्रश्नोपनिषत्
16. व्याकरणम्
17. निरुक्तम्

**निम्नोक्तप्रश्नेषु चतुर्णामुत्तरं प्रदेयम् -** **10×4=40**

18. ब्राह्मणसाहित्यमधिकृत्य एको निबन्धः प्रस्तूयताम्।
19. ऋग्वेदसंहितायाः विषयवस्तु सम्यगभिधीयताम्।
20. आरण्यकस्य महत्त्वं प्रस्तूयताम्।
21. उपनिषदां महत्त्वं वैशिष्ट्यञ्च प्रतिपाद्यताम्।
22. वेदांगसाहित्यमधिकृत्य प्रबन्धरेको विरच्यताम्।
23. अनुक्रमणीसाहित्यमधिकृत्य एको लेखः प्रस्तूयताम्।

****

2024

MASVSVA105

**संगणककौशलम्**

**पूर्णाङ्का: - 60**

**समयः – सार्धद्विघण्टा**

Write full form of the following – 1x8=8

1. CD
2. CPU
3. GB
4. MB
5. HDD
6. HTML
7. HTTP
8. WWW

Write Short notes on – 6x2=12

9. Computer
10. Email id
11. Internet

12. How to Create an Email id? (Practical) 10

Type in Sanskrit - (Practical) 20

**13.** **वेदेषु ऋग्वेद आदिमोऽस्ति । तत्र दशममण्डलस्य चतुस्त्रिंशत्तमं सूक्तमस्ति अक्षसूक्तम्। अस्मिन् सूक्ते कितवस्य जीवने द्यूतक्रीडया किं किमभवत् तद्विषयः स्पष्टतया वर्णितोऽस्ति । कृषिकर्मस्योपरि नियोजनेनैव द्यूतात् मुक्तिलाभं भवतीत्यत्र कृषिप्रशंसा अपि दृश्यते । वैदिककाले द्यूतक्रीडायाः कुफलम् अनेन सूक्तेनैव अवगम्यते।**

****